# Shri Hanumadacharyapranitah Shrihanumatprabhu Stava

# શ્રીહનુમદાચાર્યપ્રણીતઃ શ્રીહનુમત્પ્રભુસ્તવઃ

## Document Information

Text title : Shri Hanumadacharyapranitah Shrihanumatprabhu Stava

File name : hanumatprabhustavaHhanumadAchArya.itx

Category : hanumaana, rAmAnanda

Location : doc_hanumaana

Author : hanumadAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીહનુમદાચાર્યપ્રણીતઃ શ્રીહનુમત્પ્રભુસ્તવઃ

આનન્દભાષ્યકૃદ્રામાનન્દં રામં તથેશ્વરમ્ ।
ગુરું નત્વા ચ કુર્વેઽહં શ્રીહનુમત્પ્રભુસ્તવમ્ ॥ ૧॥

દેહેન્દ્રિયૈર્વિના જીવાન્ જડતુલ્યાન્ વિલોક્ય હિ ।
જગતઃ સર્જકં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૨॥

અન્તર્બહિશ્ચ સંવ્યાપ્ય સર્જનાનન્તરં કિલ ।
જગતઃ પાલકં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૩॥

જીવાઁશ્ચ વ્યથિતાન્ દૃષ્ટ્વા તેષાં હિ કર્મજાલતઃ ।
જગત્સંહારકં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૪॥

સર્જકં પદ્મયોનેશ્ચ વેદપ્રદાયકં તથા ।
શાસ્ત્રયોનિમહં બન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૫॥

વિભૂતિદ્વયનાથં ચ દિવ્યદેહગુણં તથા ।
આનન્દામ્બુનિધિં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૬॥

સર્વવિદં ચ સર્વેશં સર્વકર્મફલપ્રદમ્ ।
સર્વશ્રુત્યન્વિતં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૭॥

ચિદચિદ્દ્વારકં સર્વજગન્મૂલમથાવ્યયમ્ ।
સર્વશક્તિમહં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૮॥

પ્રભાણાં સૂર્યવચ્ચાથ વિશેષાણાં વિશિષ્ટવત્ ।
જીવાનામંશિનં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૯॥

અશેષચિદચિદ્વસ્તુવપુષ્કં સત્યસઙ્ગરમ્ ।
સર્વેષાં શેષિણં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૧૦॥

સકૃત્પ્રપત્તિમાત્રેણ દેહિનાં દૈન્યશાલિનામ્ ।
સર્વેભ્યોઽભયદં વન્દે શ્રીરામં હનુમત્પ્રભુમ્ ॥ ૧૧॥

ભાવાનન્દાયશિષ્યશ્રીહનુમદાર્યનિર્મિતઃ ।
લોકલ્યાણકૃદ્ ભૂયાચ્છ્રીહનુમત્પ્રભુસ્તવઃ ॥ ૧૨॥

ઇતિ શ્રીહનુમદાચાર્યપ્રણીતઃ શ્રીહનુમત્પ્રભુસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Hanumadacharyapranitah Shrihanumatprabhu Stava*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*